# माध्यमिकशिक्षापाठ्यक्रमः

# नीतिशास्त्रम्

**कक्षा : ९ र १०** **विषयसङ्केतः** Nit. 403 (कक्षा ९),Nit. 404 (कक्षा १०)

**पाठ्यघण्टा : ५** **वार्षिककार्यघण्टा : १६०**

## १. परिचयः

नीतिसम्बद्धानामनेकेषां विषयाणां सैद्धान्तिकानां व्यावहारिकाणां च पक्षाणां अध्ययनाध्यापनयोरुद्देश्येन नीतिशास्त्रस्यायं पाठ्यक्रमः निर्मितो वर्तते । एतस्य निर्माणाय २०७६ विक्रमवर्षीयस्य राष्ट्रियपाठ्यक्रमप्रारूपस्य मार्गदर्शनम् अनुसृतं वर्तते । विद्यालयशिक्षाया माध्यमिकस्तरस्य (नवम्या दशम्याश्च कक्षायोः) पाठ्यक्रमेऽस्मिन् विद्यार्थिनां सदाचारपालने प्रवर्तनाय, व्यावहारिककौशलस्य प्रदर्शनाय, प्रेरकविषयाणां बोधाय, अवगतविषयाणाम् अभिव्यक्तिकौशलस्य विकासाय च आवश्यकानां कार्यकलापानामुल्लेखो विहितो वर्तते । एतस्माद् वर्तमानसन्दर्भे छात्राणां व्यक्तित्वविकासमाध्यमेन, तेषां रुचेरावश्यकतायाश्च प्रपूरणेन शिक्षाया राष्ट्रियमुद्देश्यं पूर्णं भविष्यति, एतस्य सान्दर्भिकता विस्तृतिमवाप्स्यति भविष्यति, उपयुक्तता च सुनिश्चितां प्राप्स्यतीति पाठ्यक्रमस्यापेक्षा वर्तते । अस्य पाठ्यक्रमस्य माध्यमेन उच्चशिक्षायै आधारस्य निर्माणं भविष्यतीति अपेक्ष्यते ।

नीतिशास्त्रमाध्यमेन मानवानां सर्वेषु क्षेत्रेषु उन्नतिर्दृढतरा भवति । नीतिशास्त्रस्याध्ययनेन मानवाः समाजे सम्यग् व्यवहारं कर्तुं क्षमा भवन्ति । परपीडनं विनैव सदाचारसरणिम् अनुसृत्य स्वकीयं लक्ष्यम् अधिगन्तुं नीतिशास्त्रं जनान् प्रेरयति । नीतिशास्त्रमाध्यमेनैव जना अर्थनीतौ, राजनीतौ, कूटनीतौ, व्यवहारे च निपुणा भविष्यन्ति । योग्यानां निष्ठावताम्, राष्ट्रवादिनानाम्, व्यवहारकुशलानाञ्च नागरिकाणामुत्पादनाय नीतिशास्त्रस्य भूमिका अद्वितीया वर्तते । संस्कृतवाङ्मये जीवनोपयोगिनां विविधानां पक्षाणां शिक्षाप्रदायकानि अनेकानि नीतिशास्त्राणि प्रसिद्धानि सन्ति । आपातत उपदेशस्य माध्यमेन एव न, संस्कृतनीतिशास्त्रेषु कथानाम्, सुभाषितानाम्, ऐतिह्यस्य विविधानां च घटनानां माध्यमेन बालकानां प्रेरणाय वयोऽभिरुच्यनुकूलतया प्रत्यक्षतः परोक्षतो वा सच्चरित्रस्य निर्माणाय प्रयतनमेव संस्कृतनीतिशास्त्रस्य वैशिष्ट्यं वर्तते । निश्चितनीतिशास्त्रेषु एव न काव्येषु, पुराणेषु, इतिहासेषु, अन्येषु च शास्त्रेषु च यत्रतत्र जीवनोपयोगिन उपदेशा लभ्यन्ते । एतदेव संस्कृतवाङ्मयस्य महत्त्वपूर्णं वैशिष्ट्यञ्च वर्तते । बाल्यावस्था, कैशोरावस्था च चरित्रनिर्माणस्य दृष्ट्या महत्त्वपूर्णा भवति । विद्यालये विद्यार्थिभिर्ज्ञातानां विषयाणामेवाधारेण तेषां चरित्रस्य विकासो भवतीति चरित्रवत्या जनशक्तेरुत्पादनाय नीतिशास्त्रस्याध्यापनम् अपरिहार्यमेवास्ति । विद्यालयशिक्षायां नीतिशास्त्रस्याभिन्नाङ्गत्वेन स्वीकारः समावेशश्च च शिक्षाया राष्ट्रियोद्देश्यपरिपूर्तये उपकारको भवति । स्वीयजीवने, परिवारस्य, समाजस्य, राष्ट्रस्य च कृते किं कर्तव्यमिति नीतिशास्त्राध्ययनेन स्पष्टं ज्ञायते । एतदर्थं कथा-सूक्ति-पद्यादयः प्रभूततराः सामग्र्यो वर्तन्ते । तत एव छात्राणाम् आवश्यकतां स्तरं च विचार्य तदनुकूलानां सूक्तीनां कथानां च संयोजनेन पाठ्यक्रमोऽयं निर्मितो वर्तते ।

परिचयः, स्तरगतसक्षमता, कक्षगतशिक्षणोपलब्धिः, विषयवस्तुनः क्षेत्रक्रमौ, परियोजनाकार्यम्, शिक्षणसहजीकरणप्रक्रिया, विद्यार्थिमूल्याङ्कनविधिश्चेति शीर्षकेषु विभज्य पाठ्यक्रमोऽयं पूर्णतां गतो वर्तते । एतस्मिन् क्रमे पाठ्यक्रमलेखनस्य विकासस्य च विषयगतम् औचित्यम्, पाठ्यक्रमे विद्यमानां मुख्यविशेषताम्, पाठ्यक्रमस्य स्वरूपं च प्रदर्श्य परिचयः प्रस्तुतो वर्तते । अपेक्षितां वैषयिकं ज्ञानम्, शिल्पम्, अभिवृत्तिम्, कार्यतत्परताञ्च विचार्य एतस्याः क्रियात्मकस्वरूपे सक्षमता प्रस्तुता वर्तते । शिक्षणस्य स्तरमाधृत्य, सक्षमताया विशिष्टविस्तारेण शिक्षणोपलब्धिर्निर्धारिता वर्तते । सक्षमतायाः, पूर्वकक्षाभिः सह लम्बीयसन्तुलनस्य चाधारेण विषयवस्तुनः क्षेत्रक्रमौ निर्दिष्टौ वर्तेते । विषयगतां विशिष्टतां

मौलिकतां च संयोज्य शिक्षणसहजीकरणाय विधिः प्रस्तुतो वर्तते । निर्माणात्मकस्य निर्णयात्मकस्य च मूल्याङ्कनस्य विधिमुल्लिख्य विद्यार्थिनां मूल्याङ्कनपद्धतिर्व्यवस्थिता वर्तते ।

## २. स्तरगतयोग्यताः

**माध्यमिकस्तरे ९-१० कक्षयोः नीतिशास्त्रविषयमधीत्य विद्यार्थिनो निर्दिष्टविषयेषु क्षमा भविष्यन्ति -**

१. परिवारस्य सर्वैर्जनैः सह शिष्टं व्यवहारं विधातुम्, पारिवारिकं सहयोगं सहकार्यं च कर्तुम्

२. समाजस्य सर्वैः सह मिलित्वा व्यवहारं सञ्चालयितुम्, व्यावहारिकं कौशलं च प्रस्तोतुम्

३. सदसतोर्विवेकं कर्तुम्, दुर्बलानामशक्तानां जनानां सहयोगं विधातुम्

४. स्वकर्तव्यं परिचाय्य तदनुकूलानि कार्याणि कर्तुम्

५. न्यायनीत्योर्मागमबलम्बनं कर्तुम्, अन्यान् न्यायमार्गाबलम्बनाय प्रेरयितुञ्च

६. समाजे दृष्टानां दुर्व्यवहाराणां विरोधम्, सद्व्यवहाराणां समर्थनं च कृत्वा व्यवहरणम्

७. राष्ट्रगौरवं बोद्धुम्, बोधयितुम्, राष्ट्रभावनामभिव्यज्य तदनुकूलं व्यवहारं सञ्चालयितुम्

८. जीवनयापने समापतितानां समस्यानां समाधानाय सामाजिकसद्भावस्य संवर्धनाय च प्रयत्नं विधातुम्

९. आहारविहारयोः सन्तुलनं विधातुम्, स्वधर्मसंस्कृतिनिष्ठासु दृढतां प्रकटयितुञ्च

## ३. कक्षागतशिक्षणोपलब्धिः

**कक्षा ९**

**माध्यमिकस्तरीयायां ९ कक्षायां नीतिशास्त्रविषयमधीत्य छात्रैर्निम्ननिर्दिष्टा उपलब्धयोऽवाप्यन्ते-**

| शिक्षणोपलब्धयः | शिक्षणोपलब्धीनां विस्तरः |
|---|---|
| १. आदर्शजनानां जीवनवृत्तस्य कथाप्रबन्धादिपात्राणाञ्च समीक्षणेन आदर्शजीवनवृत्तस्य अनुपालनम् | १.१. निर्धारितानामादर्शजनानां जीवनवृत्तादिपाठानां शुद्धोच्चारणम्,<br>१.२. निर्धारितानां आदर्शजनानां जीवनवृत्तादि-पाठानामर्थबोधः,<br>१.३. निर्धारितानां आदर्शजनानां जीवनवृत्तादिपाठानां तात्पर्यार्थबोधः,<br>१.४. जीवनवृत्तादिपाठानां आदर्शपात्राणां सदाचारव्यवहाराणां दैनिकजीवनेऽनुकरणम्, |
| २. नीतिकथा-प्रबन्धानामर्थबोधनपूर्वकमध्ययनेन तत्र प्रस्तुतानां विषयवस्तूनां सम्यग् बोधः | २.१. निर्धारितानां नीतिकथानां सत्प्रेरणादायिनीनां कथानाञ्च साभिनयं शुद्धोच्चारणम्,<br>२.२. निर्धारितानां नीतिकथानां सत्प्रेरणादायिनीनां कथानाञ्च भाषाया |

| | |
|---|---|
| | अर्थबोधः,<br>२.३. निर्धारितानां नीतिकथानां सत्प्रेरणादायिनीनां कथानाञ्च तात्पर्यार्थबोधेन स्वकीयव्यवहारेषु तत्प्रभावप्रदर्शनम्,<br>२.४. कथानामादर्शपात्राणां शोभनाचारव्यवहाराणां स्वजीवनेऽनुकरणम्,<br>२.५. निर्धारितप्रबन्धस्य शुद्धोच्चारणम्,<br>२.६. निर्धारितप्रबन्धस्य भाषाया अर्थबोधः,<br>२.७. निर्धारितप्रबन्धस्य तात्पर्यार्थबोधेन तदनुकूलाचरणम् |
| ३. संवादात्मकानां पाठानां विषयवस्तूनां बोधः, पाठविश्लेषणम्, अनुसरणीयव्यवहारस्य अनुसरणञ्च | ३.१. निर्धारितसंवादस्य साभिनयं शुद्धोच्चारणम्,<br>३.२. निर्धारितसंवादस्य भाषार्थबोधः<br>३.३. निर्धारितसंवादस्य सच्छिक्षाया स्वकीयव्यवहारेऽनुकरणम्<br>३.४. निर्धारिताया जीवन्याः शुद्धतया सम्यगुच्चारणम्,<br>३.५. निर्धारिताया जीवन्या भाषार्थबोधः<br>३.६. संस्कृतसेविनो जीवनीतोऽनुकूलप्रेरकपक्षाणां ग्रहणम्, तदनुकूलव्यवहरणं च |
| ४. नीतिपद्यपाठानां पद्यानां लयार्थतात्पर्यबोधेन तत्प्रयोगः | ४.१. पाठान्तर्गतानां पद्यानां गति-यति-लयसंयोजनेन शुद्धोच्चारणम्<br>४.२. उच्चरितानां पद्यानामन्वयार्थबोधः<br>४.३. निर्धारितानां नीतिपद्यानां तात्पर्यबोधेन स्वकीयव्यवहारेषु अनुशीलनम्<br>४.४. नीतिपद्यपाठान्तर्गतानां धर्ममर्यादादीनां विषये वक्तृत्व-प्रवचनादिभिः स्वाभिप्रायप्रकटीकरणम् |
| ५. आचारपद्यानां पठनेन तेषां भावबोधनम्, तदनुशीलनञ्च | ५.१ पाठप्रयुक्तानामाचारपद्यानां गति-यति-लयपूर्वकं शुद्धोच्चारणम्<br>५.२ उच्चरितानामाचारपद्यानामन्वयार्थबोधः<br>५.३ निर्धारितानामाचारपद्यानां तात्पर्यबोधेन स्वव्यवहारेषु |

| | |
|---|---|
| | तदनुकूलाचरणम्<br>५.४ आचारस्य विषये वक्तृत्व-प्रवचनादिभिः स्वाभिप्रायस्य प्रकटनम् |

**कक्षा १०**

**माध्यमिकस्तरीयायां १० कक्षायां नीतिशास्त्रविषयमधीत्य छात्रैर्निम्नाङ्किता उपलब्धयोऽवाप्यन्ते-**

| **शिक्षणोपलब्धयः** | **शिक्षणोपलब्धीनां विस्तरः** |
|---|---|
| १. संस्कारविषयकाणां विषयवस्तूनां बोधेन तद्विषयकं व्याख्यानम्, तत्प्रयोगश्च | १.१. पौरस्त्यसंस्कृतिसम्मतानां विविधसंस्कारबोधकपाठानां साभिनयं पठनम्<br>१.२. पाठान्तर्गतानां संस्कारसन्दर्भानां सम्यग् बोधः<br>१.३. पाठपठितानां संस्काराणां महत्त्वख्यापनपरं विश्लेषणम्<br>१.४. संस्कारविषयाणां बोधेन यथोचितं स्वजीवने परिपालनम् |
| २. चारित्रिक-सामाजिकैतिहासिकादिकथा-प्रबन्धेभ्यः पात्र-घटनाक्रमादीनां समीक्षणेन विषयबोधः तत्प्रस्तवनञ्च | २.१. विविधानां पाठकथा-प्रबन्धानां साभिनयवाचनं मौनं पठनञ्च<br>२.२. पाठान्तर्गतानां नीतिकथानां प्रेरककथानाञ्च घटनाक्रमादिमेलनम्<br>२.३. नीतिकथानां प्रेरककथानाञ्च तात्पर्यबोधो व्यवहारेऽनुशीलनञ्च<br>२.४. कथान्तर्गतानां सच्चरित्राणां स्वचरित्रेण सह तुलनात्मकं विश्लेषणम्<br>२.५ कथा-प्रबन्धादीनां माध्यमेनानुशासन-नैतिकता-सदाचाराणामुपादेयतायाः सम्यग् बोधः, तदनुकूलाचरणञ्च<br>२.६. निर्धारितानां कथा-प्रबन्धादीनां मौनपठनम्, विषयबोधश्च<br>२.७. निर्धारितानां कथा-प्रबन्धादीनामाशयबोधः तद्विश्लेषणञ्च<br>२.८. निर्धारितानां कथा-प्रबन्धादीनां सारग्रहणम् |
| ३. संवाद-जीवनवृत्तादिनां विषयवस्तूनामवबोधेन तदनुशीलनम् | ३.१. संवाद-जीवनवृत्तादिपाठानां साभिनयं सस्वरपठनम्<br>३.२. निर्धारितानां संवाद-जीवनवृत्तादिपाठानां विषयाधारेण सन्दर्भस्य परिवेशस्य चावबोधः<br>३.३. निर्धारितानां संवाद-जीवनवृत्तादिपाठानां सन्देशस्य विश्लेषणं स्वकीयव्यवहारेऽनुकरणञ्च |

| | |
|---|---|
| | ३.४. निर्धारितजीवनवृत्ताधारेण घटनाक्रमबोधः तत्प्रस्तुतिश्च<br>३.५. निर्धारितस्य जीवनवृत्तात्मकस्य पाठस्य पात्रस्य जीवनादर्शबोधस्तदनुकूलव्यवहरणञ्च |
| ४. पद्यपाठेषु प्रस्तुतानां पद्यानां छन्दसो लक्षणज्ञानपूर्वकं भावावबोधो विश्लेषणञ्च | ४.१. पद्यपाठप्रयुक्तानां नीतिपद्यानां छन्दसो लक्षणज्ञानपूर्वकं पठनम्<br>४.२. निर्धारितपद्यानां सन्दर्भादिज्ञानपुरःसरमर्थबोधः<br>४.३. पाठान्तर्गतनीतिपद्यानां तात्पर्यबोधो व्यवहारे तदनुशीलनञ्च<br>४.४. निर्धारितेषु नीतिविषयेषु तर्कपूर्वकं स्वाभिप्रायप्रकटीकरणम्<br>४.५ वैदिकीनां सूक्तीनां सत्सन्देशाना प्रसङ्गानुरूपं व्यवहारे प्रयोगः |
| ५. आचारपद्यानां तात्पर्यबोधेन श्लाघनीयचरित्रस्य अनुपालनम् | ५.१ पाठप्रयुक्तानामाचारपद्यानां गति-यति-लयपूर्वकं शुद्धोच्चारणम्<br>५.२ निर्धारितानामाचारपद्यानां विषयवस्तूनां बोधः<br>५.३ निर्धारितानामाचारपद्यानां सन्देशमनुसृत्य तदनुकूलाचरणेनोदात्तजीवनशैलीभावनम्<br>५.४ सामूहिकपरामर्शावसरे नैतिकमूल्यमान्यतादिविषये तर्कपूर्वकं स्वाभिमतप्रस्तवनम् |

## ४. विषयस्य क्षेत्रक्रमौ

कक्षा ९

| **क्र.सं.** | **विधा** | **उपविधा** | **विषयवस्तुनः क्षेत्रम्** | **शिक्षणघण्टाः** | |
|---|---|---|---|---|---|
| | | | | **सैद्धान्तिकाभ्यासः** | **पूर्णाङ्काः** |
| १. | गद्यम् | कथा | (क) नीतिकथे<br>(नीतिग्रन्थेभ्य उद्धृते द्वे कथे)<br>(ख) चरित्रप्रधाने कथे<br>(अहिंसास्वावलम्बनयोर्विषये लिखिते द्वे कथे)<br>(ग) सामाजिकी कथा<br>(सामाजिक्या एकताया विषये लिखिता)<br>(घ) पौराणिकी कथा<br>(पौराणिकम् आदर्शचरितं गृहीत्वा लिखिता)<br>(ङ) ऐतिहासिकी कथा<br>(आदिवासिजनजातिभ्यो नैपालकम् ऐतिहासिकं गृहीत्वा अनुकरणीयां घटनां वर्णयित्वा लिखिता) | ४० | २४ |
| | | प्रबन्धः | (क) सहकार्यविषयकः | १४ | ९ |

| | | | | | |
|---|---|---|---|---|---|
| | | | (ख) ज्येष्ठसम्मानविषयकः | | |
| २. | गद्यम् | संवादः | (क) प्रकृतिविषयकः<br>(अस्माकं परम्परायां प्रकृतिपूजाया महत्त्वविषये लिखितः)<br>(ख) संस्कारविषयकः<br>(अन्नप्राशनसम्बद्धः) | १६ | १० |
| | | जीवनवृत्तम् | (क) आदर्शनारी<br>(राष्टि««यजगतः)<br>(ख) आदर्शपुरुषः<br>(राष्टि««यजगतः) | १४ | ९ |
| ३. | पद्यम् | नीतिपद्यम् | (क) नेतृत्वविषयकम्<br>(ख) शान्तिविषयकम् | १४ | ८ |
| ४. | पद्यम् | आचारपद्यम् | (क) दानविषयकम्<br>(ख) क्षमाविषयकम् | १४ | १० |
| ५. | सूक्तिः | वैदिकी | सद्भाववर्धिनी | ८ | ५ |
| सैद्धान्तिकाभ्यासः | | | | १२० | ७५ |
| प्रयोगाभ्यासः | | | | ४० | २५ |
| योगः | | | | १६० | १०० |

कक्षा १०

| क.सं. | विधा | उपविधा | विषयवस्तुनः क्षेत्रम् | शिक्षणघण्टाः | |
|---|---|---|---|---|---|
| | | | | सैद्धान्तिकाभ्यासः | पूर्णाङ्काः |
| १. | गद्यम् | (अ) कथा | (क) नीतिकथा<br>(नीतिग्रन्थेभ्य उद्धृते द्वे कथे)<br>(ख) चरित्रप्रधाने कथे<br>(दुर्व्यसनभ्रष्टाचारयोर्हानिविषयिके द्वे कथे)<br>(ग) सामाजिकी कथा<br>(परिवारधर्मविषयिका)<br>(घ) वैदिकी कथा<br>(वैदिकेनादर्शचरितेन सम्बद्धा)<br>(ङ) ऐतिहासिकी कथा<br>(अन्താराष्टि««यजगत ऐतिहासिकचरितस्यानुकरणीयघटनावर्णनसम्बद्धा) | ४० | २४ |
| | | (आ) प्रबन्धः | (क) मानवताविषयकः<br>(ख) प्राणिसेवाविषयकः | १४ | ९ |
| २. | गद्यम् | (अ) संवादः | (क) संस्कृतिविषयकः<br>(आतिथ्यपरम्परासम्बद्धः)<br>(ख) संस्कारविषयकः<br>(गृहस्थधर्मेण सह विवाहोत्सवसम्बद्धः) | १६ | १० |
| | | (आ) जीवनवृत्त | (क) आदर्शनारी (अन्ताराष्टि««यजगतः) | १४ | ९ |

| | | | | | |
|---|---|---|---|---|---|
| | | म् | (ख) आदर्शपुरुषः (राष्टि««यजगतः-उत्पीडितसमुदायस्य) | | |
| ३. | पद्यम् | (अ) नीतिपद्यम् | (क) राज्यनीतिविषयकम्<br>(ख) सन्तति/मानवकर्तव्यविषयकम् | १४ | ८ |
| ४. | पद्यम् | (आ) आचारविषयकम् | (क) आत्मसम्मानविषयकम्<br>(ख) प्रजाधर्मविषयकम् | १४ | १० |
| ५. | सूक्तिः | वैदिकी | कर्मसम्बद्धा | ८ | ५ |
| सैद्धान्तिकाभ्यासः | | | | १२० | ७५ |
| प्रयोगाभ्यासः | | | | ४० | २५ |
| योगः | | | | १६० | १०० |

## ५. परियोजनाकार्यमितरे कार्यकलापाश्च

पाठ्यवस्तूनां सम्यगभ्यासार्थं परियोजनात्मकं कार्यमपेक्षितं भवति । तत्रेतरे कार्यकलापाश्च सहाया भवन्ति । निदर्शनरूपेण ते यथा–

| क्र.सं. | क्षेत्रम् | परीक्षणीयाः पक्षाः | मूल्याङ्कनस्य आधाराः | शिक्षणघण्टाः |
|---|---|---|---|---|
| १. | उपस्थितिः | उपस्थितिः | कक्षागता उपस्थितिर्मूल्याङ्कनस्य आधाररूपेण कल्पनीया । | |
| २. | परियोजनात्मकं सामूहिकं कार्यञ्च | परियोजनात्मकं कार्यम् | मान्यजनानां तिरस्कारः, दुर्व्यसननिरततेत्यादिसमस्यानां परिचर्चया सद्व्यवहारार्थं छात्राः प्रेरणीयाः । विषयेऽस्मिन् छात्रैः प्रस्तुतानां परियोजनाकार्याणाञ्च मूल्याङ्कनं करणीयम् । | ४ |
| | | सामूहिकं कार्यम् | पर्यावरणस्य स्वच्छतायै छात्रान् योजयित्वा तेषां कार्यनिरीक्षणेन मूल्याङ्कनं कर्तव्यम् । | २ |
| ३. | चरित्रविकासः | छात्राणां व्यवहारः | स्वस्य मित्राणाञ्च कार्येषु आपतितानां समस्यानां निराकरणाय छात्राः कथं किं किं च कुर्वन्तीति वीक्ष्य तन्मूल्याङ्कनं विधेयम् । | २ |
| | | विश्वासभावः | मित्रेषु, शिक्षकेषु, विद्यालयकर्मकरेषु च छात्राणां विश्वासभावं निरीक्ष्य तन्मूल्याङ्कनं सम्पादनीयम् । | १ |
| ४. | व्यवहारानुपालनम् | औचित्यानौचित्यविवेकः | समाजे सद्वृत्ता असद्वृत्ताश्च जना भवन्ति । तेषु कतरेषां जनानां प्रभावश्छात्राणां व्यवहारेषु दृश्यत इति भावेन मूल्याङ्कनं करणीयम् । आधुनिकप्रविधेरुपयोगस्य अधिकप्रयोगस्य दुरुपयोगस्य वा विषये | ३ |

| | | | | |
|---|---|---|---|---|
| | | | छात्रैः सह संवादपूर्वकं तद्वर्तनं विज्ञाय तन्मूल्याङ्कनं विधेयम् । | |
| ५. | मानवीयमूल्यस्य परिज्ञानम् | मानवीयमूल्यं बुद्ध्वा तदनुरुपमाचरणम् | ज्येष्ठेषु समादरभावः, कनिष्ठेषु स्नेहभावश्च अस्ति न वेति छात्रव्यवहारं समीक्ष्य मूल्याङ्कनं कार्यम् । | १ |
| | | उत्तरदायित्वबोधः | कक्षाकार्येषु, गृहकार्येषु, स्वच्छतायाञ्च छात्राणां सहभागिताया निरीक्षणेन मूल्याङ्कनं करणीयम् । | १ |
| | | धैर्यधारणम् | प्रार्थनासभायाम्, कक्षाकार्यगृहकार्ययोः परीक्षणार्थं शिक्षकाय प्रदानावसरे, क्रीडावसरे, अध्ययनकाले च छात्राणां धैर्यधारणस्य मूल्याङ्कनं विधेयम् । | १ |
| ६. | कर्तव्यबोधः | नियमपालनम् | कक्षागतानाम्, खेलगतानाम्, अन्येषाञ्च विद्यालयीयानां नियमानां पालनं कथं कुर्वन्तीति समीक्ष्य छात्रमूल्याङ्कनं कर्तव्यम् । | १ |
| | | शिष्टाचारः | मान्यैः, शिक्षकैः, मित्रैश्च सह छात्राणां वाग्व्यवहारम्, अभिवादनादिव्यवहारञ्च निरीक्ष्य शिष्टाचारविषयकं मूल्याङ्कनं कार्यम् । | १ |
| | | साहाय्यभावः | छात्रेषु पारस्परिकः साहाय्यभावम्, साहाय्यप्रदानावसरे कृतज्ञता-धन्यवादादिवाग्व्यवहारञ्च समीक्ष्य छात्राणां हृद्गतानां निःस्वार्थ-परार्थभावानां मूल्याङ्कनं विधेयम् । | १ |
| | | सार्वजनिकवस्तूनां सदुपयोगः | मार्ग-सेतु-चत्वरोद्यान-मन्दिर-जनाश्रयादीनां सदुपयोगाय छात्राः कियन्तः सचेतसः सन्तीति परीक्ष्य तन्मूल्याङ्कनं करणीयम् । | १ |
| | | अधिकारस्य प्रत्याभूतिः | समाजस्य विद्यालयस्य च कार्यकलापेषु स्वाधिकारप्रयोगाय जागरुगकताया आधारेण छात्राणां मूल्याङ्कनं कार्यम् । | १ |
| ७. | विविधतां प्रति सम्मानभावः | सामाजिकविविधतायाः सम्मानः | समाजस्य विविधानां समुदायानां छात्रेषु पारस्परिकं व्यवहारं समीक्ष्य तन्मूल्याङ्कनं विधेयम् । | १ |
| | | सांस्कृतिकविविधतायाः सम्मानः | समाजस्य वर्ण-धर्मगतासु विविधासु संस्कृतिषु छात्राणां भावं समीक्ष्य मूल्याङ्कनं करणीयम् । | १ |
| | | पारस्परिकी सहिष्णुता | छात्रेषु पारस्परिकेषु विविधेषु सामाजिक-सांस्कृतिकादिव्यवहारेषु सहिष्णुताया भावं समीक्ष्य मूल्याङ्कनं कार्यम् । | १ |
| ८. | शोभनं चिन्तनम् | चिन्तनशैली | छात्राणां सामूहिककार्येषु, मित्राणि, | ३ |

| | | | | |
|---|---|---|---|---|
| | | | शिक्षकांश्च प्रति कीदृशं चिन्तनमस्ति, पारस्परिकेषु कार्यदोषेषु ते कीदृशान् विचारान् प्रकटयन्तीति च समीक्षणेन छात्रमूल्याङ्कनं करणीयम् । | |
| ९. | संवेगस्य व्यवस्थापनम् | संवेगनियमनम् | कार्यगतेषु परिणामगतेषु च विविधेषु सन्दर्भेषु क्रोध-प्रसाद-दर्पादिभावानां नियमनं कर्तुं छात्राः प्रभवन्ति न वेति समीक्ष्य तन्मूल्याङ्कनं कर्तव्यम् । | ३ |
| १०. | परीक्षा | दैनिकं मूल्याङ्कनम् | कक्षाकार्यस्य गृहकार्यस्य कक्षागतसक्रियतायाश्च आधारेण छात्राणां दैनिकं मूल्याङ्कनं विधेयम् । | ३ |

## ६. शिक्षणसहजीकरणप्रक्रिया

नीतिशास्त्रं मानवानां व्यावहारिकस्य पक्षस्य शोभनतायै प्रेरयति । शास्त्रमिदमध्येतृषु सदाचारभावं समुद्भावयति । अतोऽस्य शिक्षणे व्यावहारिकाणां शिक्षणविधीनामुपयोगः प्रभावकरः सेत्स्यति । छात्रकेन्द्रितानां शिक्षणविधीनामवलम्बनेन विषयोऽयमध्यापनीयः । नीतिशास्त्रगतानां विषयवस्तूनामध्यापनेन सहैव छात्राणां व्यवहारपरिवर्तनस्य पक्षे च शिक्षकैर्ध्यानं प्रदेयम् । छात्रकेन्द्रितानां शिक्षणकार्यकलापानां प्रयोगेण छात्राणां ज्ञान-शिल्पयोः पक्षे वृद्धिर्भावनीया । नीतिविषयकाणां सूक्ति-गीत-काव्य-कथा-संवादादीनां प्रयोगेण शिक्षणे साहज्यं सम्पादनीयम् ।

कक्षागतेषु कार्यकलापेषु व्यावहारिकेषु कार्येषु च सहभागितायै छात्राणां प्रेरणेन छात्रेषु नीतिशास्त्रस्य प्रायोगिकपक्षो द्रढीकरणीयः । शिक्षणावसरे लघ्वीनां प्रेरककथानां सूक्तीनाञ्च श्रावणं पाठ्यविषये छात्राणां ध्यानं समाकर्षयितुं सहायं भवति । पाठ्यविषयैः सह छात्राणां जीवने घटितासु घटनासु, तेषां दैनिकेषु कर्मसु च कियती समानता वर्तत इति विषये च विचारप्रकटनाय छात्राः प्रेरणीयाः । एतेन छात्राः पाठ्यविषये साहज्येन प्रविष्टा भवन्ति । शिक्षणे प्रभावोत्पादकतां भावयितुं पाठ्यविषयाणां प्रकृत्यनुरूपाः कार्यकलापाः कल्पनीयाः । पाठ्यविषयानुरूपा एव शिक्षणविधयः प्रयोक्तव्याः । उदाहरणार्थम्–

### (क) प्रश्नोत्तरविधिः

पाठ्यविषयेषु समाविष्टानामवधारणानाम्, सदसद्व्यवहाराणाम्, कार्याणामौचित्यानौचित्ययोश्च सन्दर्भेषु छात्राणां बोधनेन बोधस्य मूल्याङ्कनञ्च विधातुं प्रश्नोत्तरविधिः समुचितो भवति । बहुवैकल्पिकप्रश्नावलिं निर्माय लिखितः प्रश्नोत्तरविधिश्च प्रयोक्तुं शक्यते ।

### (ख) परामर्शविधिः

सामाजिकानां व्यावहारिकाणाञ्च समस्यानां विषये छात्रेषु परस्परं परामर्शं कारयित्वा समस्यासमाधानाय उपायान् विचारयितुमयं विधिरनुष्ठातुं शक्यः । अनेन विधिना पाठ्यविषयाणां सम्यग् बोधाय, पाठसम्बद्धविषयाणां समुद्भावनाय च साहज्यं भवति ।

### (ग) परियोजनाकार्यविधिः

शैक्षिक-सामाजिक-सांस्कृतिकविषयेषु एकाकितया सामूहिकरूपेण च कार्यं कारयित्वा पाठ्यविषयाणां बोधाय विधिरयमुपयोगी भवति । छात्राणां रुच्यनुसारेण विविधानि शीर्षकाणि परिकल्प्य परियोजनाकार्यार्थं छात्राः प्रेरणीयाः ।

**(घ) स्थलभ्रमणविधिः**

विविधानां स्थलानां भ्रमणेन विविधवर्ण-धर्म-भाषा-परम्पराणां बोधो भवति । अतः समुदायस्य अध्ययनेन व्यवहारनैपुण्यार्जनाय भ्रमणार्थं छात्राः प्रेरणीयाः, शैक्षिकभ्रमणाय विद्यालयतः च व्यवस्था करणीया । विविधानां स्थलानां प्रत्यक्षतयावलोकनेन ज्ञानार्जनाय छात्राः प्रोत्साहनीयाः ।

**(ङ) समस्यासमाधानविधिः**

छात्रैः शिक्षकैः सामाजिकैश्च सह सम्बद्धानां समस्यानां समाधानविषये कक्षायां छात्राणां मध्ये परिचर्चा कारणीया । समाजे घटितानां घटनानां श्रावणाय, घटनागतसमस्यानां निराकरणाय अनुष्ठितानामुपायानाञ्च विषये परामर्शः करणीयः । व्यक्तिगतानां समस्यानाञ्च कथनाय छात्राणां प्रेरणेन तत्समाधानविषये परामर्शः सञ्चालनीयः ।

**(च) अनुसन्धानविधिः**

समाजे स्थितानां विविधरुचीनां जनानां व्यवहारस्य निरीक्षणेन व्यवहारगतानां शोभनाशोभनानां पक्षाणां विषये विविच्य तथ्यानि प्रस्तोतुं छात्राः प्रेरणीयाः । एतेन प्रत्यक्षतया समाजस्य अध्ययनद्वारा सच्चरित्रस्य ज्ञानञ्च छात्राणां कृते सुकरं भवति ।

**(छ) कथाकथनविधिः**

सामाजिक-पौराणिक-सांस्कृतिकादीनां कथानामन्वेषणेन कक्षायां तच्छ्रावणाय छात्राः प्रेरणीयाः । कथाश्रवणानन्तरं कथासन्देशविषये कथनाय अन्ये छात्राश्च प्रोत्साहनीयाः । श्रावितानां कथानां विश्लेषणं शिक्षकेण च करणीयम् ।

**(ज) अभिनयविधिः**

नीतिशास्त्रस्य पाठ्यांशगतानां बाह्यानाञ्च कथा-संवादादीनामभिनयार्थं छात्राः प्रेरणीयाः । अभिनयानन्तरमभिनयगतस्य अनुकरणीयपक्षस्य चर्चा च विधातव्या ।

**(झ) श्रव्य-दृश्यसामग्रीप्रदर्शनविधिः**

सामग्रीणामुपलब्धतानुसारेण पाठसम्बद्धानां श्रव्य-दृश्यसामग्रीणां प्रदर्शनं करणीयम् । श्रव्य-दृश्यसामग्रीणां प्रदर्शनेन सह अध्यापितस्य पाठस्य अधिकतरः प्रभावः छात्राणां मनस्सु भवति ।

**(ञ) दूरशिक्षणविधिः**

अन्तर्जालादिषु संस्थापितानां नीतिविषयाणां सामग्रीणां यथासम्भवं प्रस्तवनेन च छात्राः शिक्षणीयाः । आधुनिकानां शिक्षणोपकरणानां प्रयोगेण शिक्षणेन छात्राणां विषयगताभिरुचिश्च प्रवर्धते ।

## ७. मूल्याङ्कनप्रक्रिया

विद्यार्थिनां शिक्षणोपलब्धिं सुनिश्चेतुं निर्माणात्मकं निर्णयात्मकञ्चोभयप्रकारकमेव मूल्याङ्कनं विधातव्यं भवति । विद्यार्थिनां शिक्षणोपलब्धेः सुधाराय कक्षाशिक्षणस्यैव क्रमे कक्षाकार्य-परियोजनाकार्य-प्रस्तुतीकरणोपलब्धिपरीक्षासदृशाः क्रियाकलापा विधेयाः । एतत्कार्यस्य प्रभावकारिरूपेण क्रियान्वयनाय, विद्यार्थिनां शिक्षणस्तरस्य सुधाराय च सहजीकरणक्रियाकलापस्य अभिन्नाङ्गस्य रूपेण निर्माणात्मकमूल्याङ्कनमुपयोक्तव्यम् । निर्माणात्मकमूल्याङ्कनस्य शिक्षणोपलब्धेर्निश्चितभारो निर्णयात्मकमूल्याङ्कनेऽपि संयोज्यते ।

पाठ्यक्रमेण निर्धारितस्योद्देश्यस्यानुरूपं विद्यार्थिनो ज्ञान-शिल्पाभिवृत्तीः प्राप्नुवन्न वेति विषयस्यान्वेषकं महत्वपूर्णं संयन्त्रं मूल्याङ्कनमस्ति । विद्यार्थिनां मूल्याङ्कने स्तरगतक्षमतानां शिक्षणोपलब्धीनां च विचारो विधेयः । आन्तरमूल्याङ्कनविधिना बाह्यमूल्याङ्कनविधिना चास्मिन् विषये विद्यार्थिनां मूल्याङ्कनं कार्यम् । मूल्याङ्कनस्य समग्रभारात् प्रतिशतं पञ्चविंशत्यङ्का आन्तरिकमूल्याङ्कने पञ्चसप्तत्यङ्काश्च बाह्यमूल्याङ्कने प्रदेयाः । मूल्याङ्कनं निर्माणात्मकपद्धत्या निर्णयात्मकपद्धत्या क्रियते । अस्य विषयस्य पाठ्यक्रमे समाविष्टानां स्तरगतक्षमतानाम्, कक्षागतशिक्षणोपलब्धीनाम्, विषयवस्तूनाम्, शिल्पस्य, शिक्षणसहभागितायाः शिक्षणसक्रियतायाश्चाधारेण विद्यार्थिनां मूल्याङ्कनं विधातव्यम् ।

छात्राणां स्तरगतसामर्थ्योपलब्धये विधातव्यैरध्ययनभ्रमण-घटनावलोकन-सर्जनकार्य-वैयक्तिकसामूहिकविमर्शन-लिखितपरीक्षा-प्रत्युत्पन्नमतिप्रदर्शन-प्रश्नोत्तर-कक्षाकार्यपरीक्षण-भाषिकव्यवहारप्रभृतिकार्यैर्निर्माणात्मकं मूल्याङ्कनं विधीयते, येन अविच्छिन्नं मूल्याङ्कनं सम्पद्यते । स्तरगतसामर्थ्योपलब्धये कक्षागतसामर्थ्योपलब्धये च शैक्षिकसत्रस्यान्तेऽन्तिमपरीक्षाया माध्यमेन निर्णयात्मकमूल्याङ्कनं सम्पाद्यते । विद्यार्थिषु पाठ्यवस्तुबोधादर्शचरित्रनिर्माण-मानवीयमूल्यावलम्बन-वाङ्मयसंरक्षण-वाङ्मयस्योपयोग-प्रभृतिविषयाणां विकासो मूल्याङ्कनस्य मूलाधारो मन्यते ।

मूल्याङ्कनप्रक्रियां विश्वसनीयां विधिसम्मताञ्च सम्पाद्य एकरूपां कर्तुं स्थानीय-प्रादेशिक-राष्ट्रियस्तरेषु बाह्यसार्वजनिकपरीक्षणविधौ सर्वेषु विषयेषु आन्तरं बाह्यं च मूल्याङ्कनं विधीयते । सार्वजनिकपरीक्षणे प्रतिविषयं प्रतिशतं पञ्चविंशत्या अङ्कानां कृते आन्तरं परीक्षणं, प्रतिशतं पञ्चसप्तत्या अङ्कानां कृते बाह्यं परीक्षणञ्च विधीयते । आन्तरं मूल्याङ्कनं सम्बद्धविद्यालयस्य शिक्षकेणैव विधातव्यम् । शिक्षणप्रक्रियया सहैव विषयवस्तुसम्बद्धं मूल्याङ्कनं नैरन्तर्येण विधेयम् । तत्र शिक्षणोपलब्धयः औपचारिकरूपेण अनौपचारिकरूपेण च परिमापनीयाः । शिक्षणसहजीकरणस्य क्रमे विद्यार्थिभिरधिगतानां ज्ञानशिल्पप्रयोगोच्चदक्षतासम्बद्धपक्षाणां मूल्याङ्कनञ्च अनिवार्यतया विधेयम् ।

(क) आन्तरं मूल्याङ्कनम्

शिक्षणसहजीकरणप्रक्रियया कक्षागतशिक्षणेन सहैव छात्राणामान्तरं निर्माणात्मकं वा मूल्याङ्कनमपि कर्तव्यम् । नीतिशास्त्रविषयस्य शिक्षणक्रमे छात्राणां निर्माणात्मकमूल्याङ्कनाय अधोऽङ्किता विधयोऽवलम्बयितुं शक्यन्ते-

- लिखितप्रश्नोत्तरमाध्यमेन
- मौखिकप्रश्नोत्तरमाध्यमेन
- छात्राणां परस्परविचारविमर्शमाध्यमेन
- कार्याभ्यासेन

अधोलिखिताधारेणान्तरमूल्याङ्कनं कर्तव्यम् :

| क्र.सं. | क्षेत्रम् | अङ्कभारः |
|---|---|---|
| १. | शिक्षणसहभागिता | ३ |
| २. | कक्षाकार्यं परियोजनाकार्यं वा | ६ |
| ३. | विषयवस्तुगतं मूल्याङ्कनम् | १० |

| | | |
|---|---|---|
| ४. | त्रैमासिकपरीक्षा | ६ |
| योगः | | २५ |

(ख) बाह्यमूल्याङ्कनम्

निर्णयात्मके बाह्ये वा मूल्याङ्कने पाठ्यक्रमे निर्धारितोद्देश्यानुरूपं छात्रैः ज्ञानम्, शिल्पं चाधिगतं न वेति सम्परीक्ष्य तदनुसारेण स्तरगतयोग्यता निर्णीयते । एतादृशं मूल्याङ्कनमावधिकं भवति । शैक्षिकसत्रस्यान्त एतन्मूल्याङ्कनं विधीयते ।

अधो लिखिताधारेण बाह्यमूल्याङ्कनं कर्तव्यम् :

## विशिष्टीकरणतालिका

**कक्षा : १०** **पूर्णाङ्काः ७५**

**समयः सपादघण्टाद्वयम्**

| **क्र. स.** | **विषयक्षेत्रम् (पठनं लेखनञ्च)** | **प्रश्नप्रकृतिः** | **ज्ञानम्** | | | **बोधः** | | | **शिल्पम्** | | | **उच्च-दक्षता** | | | **प्रष्टव्याः प्रश्न सङ्ख्याः** | **अङ्क भारः** | **स्पष्टीकरणम्** |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | **क** | **ख** | **ग** | | | |
| १. | गद्यम् (कथा) | ज्ञान-बोध-प्रयोगोच्च-दक्षतात्मिका | - | - | - | ३ | - | - | - | ५ | - | - | - | १६ | ६ | २४ | **बोध**क्षेत्रतः-<br>लघुगद्यांशं पठित्वा शीर्षकनिर्धारणसम्बद्ध एकः प्रश्नः, सन्देशलेखनसम्बद्ध एकः प्रश्नः, कथान्तर्गतं संवादम् आधृत्य पात्रनामलेखनसम्बद्धश्च एकः प्रश्नः। (३) अङ्काः)<br>**शिल्प**क्षेत्रतः-<br>सूत्राण्याधृत्य कथारचनासम्बद्ध एकः प्रश्नः। (५ अङ्काः)<br>**उच्चदक्षता**क्षेत्रतः-<br>प्रदत्तगद्यांशम् अपि आधृत्य पठितकथायाः सारलेखनसम्बद्ध एकः प्रश्नः। (८ अङ्काः)<br>पठितकथांशम् आधृत्य समस्यानिर्देशनपुरःसरं समाधानलेखनसम्बद्ध एकः प्रश्नः ( व्यवहारानुशीलनोपायकथनम्)। (८ अङ्काः) |
| २. | गद्यम् (प्रबन्धः) | ज्ञान-बोध-प्रयोगात्मिका | २ | - | - | २ | - | - | - | ५ | - | - | - | - | ५ | ९ | **ज्ञानबोध**क्षेत्रतः-<br>पठितगद्यांशाद् उत्तरलेखनार्थं द्वौ प्रश्नौ। (२ अङ्काः)<br>पठितगद्यांशम् आधृत्य सत्यासत्यविवेचनसम्बद्धौ द्वौ प्रश्नौ। ( २ अङ्काः)<br>**शिल्प**क्षेत्रतः-<br>सूत्राण्याधृत्य अनुच्छेदरचनासम्बद्ध एकः प्रश्नः। (५ अङ्काः) |
| ३. | गद्यम् (संवादः) | प्रयोगात्मिका | - | - | - | - | - | - | - | १० | - | - | - | - | २ | १० | **शिल्प**क्षेत्रतः-<br>रिक्तस्थानपूर्त्या संवादलेखनसम्बद्ध एकः प्रश्नः। (५ अङ्काः) |

| | | | | | | | | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|---|
| | | | | | | | | | | | | | | | | गद्यांशम् अपि आधृत्य चरित्रचित्रणसम्बद्ध एकः प्रश्नः । (५ अङ्काः) |
| ४. | गद्यम् (जीवन वृत्तम्) | बोधोच्च-दक्षतात्मिका | ४ | - | - | - | - | - | - | ५ | - | - | - | - | ५ | ९ | **ज्ञान**क्षेत्रतः-<br>लघूत्तरापेक्षिणः चत्वारः प्रश्नाः । (४ अङ्काः)<br>**उच्चशिल्प**क्षेत्रतः-<br>प्रेरणालेखनसम्बद्ध एकः प्रश्नः । (५ अङ्काः) |
| ५. | पद्यम् (नीतिपद्यम्) | बोध-प्रयोगोच्चदक्षतात्मिका | - | - | - | - | - | - | - | - | - | - | - | ८ | १ | ८ | **उच्चदक्षता**क्षेत्रतः-<br>अन्वयलेखनसम्बद्ध एकः प्रश्नः, भावार्थलेखनसम्बद्धश्च एकः प्रश्नः । (४+४ अङ्काः) |
| ६. | पद्यम् ( आचारविषयकम्) | ज्ञान-प्रयोगोच्च-दक्षतात्मिका | - | - | - | - | - | - | - | १० | - | - | - | - | २ | १० | **शिल्प**क्षेत्रतः-<br>भूमिकानुसारं कर्तव्यलेखनसम्बद्ध एकः प्रश्नः । (५ अङ्कः)<br>प्रदत्तश्लोकम् आधृत्य विषयवर्णनसम्बद्ध एकः प्रश्नः । (५ अङ्कः) |
| ७. | सूक्तिः (वैदिकी) | प्रयोगात्मिका | - | - | - | - | - | - | - | ५ | - | - | - | - | १ | ५ | **शिल्प**क्षेत्रतः-<br>सूक्तिवर्णनसम्बद्ध एकः प्रश्नः । (५ अङ्काः) |
| योगः | | | ६ | | | ५ | | | | ४० | | | | २४ | २२ | ७५ | |

# निदर्शनप्रश्नाः

# नीतिशास्त्रम्

**कक्षा :** १०

**समयः** घण्टात्रयम् **पूर्णाङ्काः** ७५

१. **अधो लिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तरं लिखत**

जनः जीवनधारणार्थं यां कामपि आजीविकां स्वीकर्तुं शक्नोति । शिक्षणं कृषिं वाणिज्यं सेवाकर्म वा किमपि करोतु परन्तु सदा जीवने सफलतायै शोभनं कर्म करोतु । लक्ष्यविहीनं जीवनं व्यर्थं भवति । अतः कदाचिदपि लक्ष्यस्य त्यागो न करणीयः । मनुष्यः सदैव सत्कार्येषु परिश्रमं करोति चेद् जीवनयात्रायामवश्यं सफलो भवति ।

(क) **एकवाक्येन उत्तरयत** **१×२=२**

(अ) जनः सफलतायै कीदृशं कर्म करोतु ?

(आ) लक्ष्यविहीनं जीवनं कथं भवति ?

(ख) **उचिते उत्तरे ☑ अनुचिते च ☒ चिह्नं दत्त** **१×२=२**

(अ) जनो जीवनधारणार्थं चौर्यकर्म अपि कर्तुं शक्नोति । ☐

(आ) कदाचिदपि लक्ष्यस्य त्यागो न करणीयः । ☐

२. **अधो लिखितस्य श्लोकस्य अन्वयं पूरयत** **१×४=४**

पापिनाञ्च सदा दुःखं सुखं वै पुण्यकर्मणाम् ।

एवं स्थिरतरं ज्ञात्वा साधुवृत्तिं समाचरेत् ॥

**अन्वयः**

सदा ............ दुःखम् ..........च वै सुखम्, एवम्........... ज्ञात्वा साधुवृत्तिम् .......... ।

३. **अधो लिखितस्य श्लोकस्य भावार्थं पूरयत** **१×४=४**

वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः ।

स केनापि प्रकारेण परैर्न परिभूयते ॥

**भावार्थः -** यो मन्त्री वाचि .........धैर्ययुक्तः ..................निर्भीकश्च

भवति, सः ...........जनैः केनापि प्रकारेण न ..............।

**मञ्जूषा**

| सभामध्ये, अन्यैः, वशीक्रियते, पटुः |
|---|

४. **जीवनवृत्तांशं पठित्वा प्रश्नान् उत्तरयत** **१×४=४**

स्वामी विवेकानन्दः कोलकातानगरे जन्म अलभत । तस्य पिता विश्वनाथदत्तो माता च भुवनेश्वरी देवी आस्ताम् । तस्य प्रथमं नाम नरेन्द्र आसीत् । नरेन्द्रो बाल्यादेव क्रीडापटुः, दयालुः, विचारशीलश्च आसीत् । 'ईश्वरोऽस्ति न वा' इति शङ्का तस्य मनसि आसीत् । शास्त्राणाम् अध्ययनेन, साधुजनैः सह मेलनेन च तस्य शङ्कायाः परिहारो नाभवत् । अन्ते स रामकृष्णपरमंहसस्य सकाशात् तां शङ्कां न्यवारयत् । स ईश्वरस्य अस्तित्वविषये विश्वस्तोऽभवत् । स रामकृष्णस्य एव शिष्यश्चाभवत् । पश्चात् स विश्वधर्मसम्मेलने भागं ग्रहीतुम् अमेरिकादेशस्य सिकागोनगरं गतवान् । तत्र अनेकेषां देशानां सहभागिनो जनान् उद्दिश्य भाषणं कृतवान् । स तेन विश्वप्रसिद्धोऽभवत् । स पौरस्त्यदर्शनस्य, वैदिकधर्मस्य च प्रचारम् अकरोत् । स 'उत्तिष्ठ, जागृहि, दीनदेवो भव, दरिद्रदेवो भव' इत्यादीन् उपदेशान् वितीर्य जनान् सेवाकर्मणि प्रेरितवान् ।

(क) कस्य प्रथमं नाम नरेन्द्र आसीत् ?

(ख) विवेकानन्दस्य मातुर्नाम किम् ?

(ग) विवेकानन्दः कां न्यवारयत् ?

(घ) विवेकानन्दः कस्य प्रचारमकरोत् ?

५. **विवेकानन्दस्य जीवनवृत्ताल्लब्धां प्रेरणां पञ्चभिर्वाक्यैर्लिखत ।** **१×५=५**

६. **मञ्जूषाया आधारेण प्रबन्धात्मकमनुच्छेदं पूरयत** **०.५×८=४**

परेषां .......... हिताय कृतं कार्यमेव परोपकारः । मनुष्ये प्रवृत्तिद्वयं दृश्यते, एका ..........., अपरा च परोपकारस्य । केचन केवलं स्वार्थपरायणाः .......... । ते परोपकारं .......... कुर्वन्ति । ते जना उत्तमाः सन्ति, .......... परार्थाय .......... कुर्वन्ति । तादृशा जनाः स्वार्थं सेवमानाः परमार्थमपि चिन्तयन्ति । ते यथाशक्ति परोपकारं च .......... । परोपकारेण मनुष्यस्य .......... वर्धते । तादृशो जनः सर्वेषां मनसि वसति ।

**मञ्जूषा**

| |
|---|
| स्वार्थस्य, जनानाम्, भवन्ति, ये, नहि, कार्यम्, यशः, कुर्वन्ति |

## ७. घटनासंयोजनेन कथां रचयत ८

(क) भागीरथीतीरे पाटलिपुत्रनामधेयं नगरमासीत् ।

(ख) तत्र सुदर्शनो नाम सर्वगुणोपेतो राजासीत् ।

(ग) तस्य पुत्रा उन्मार्गगामिनोऽनधिगतशास्त्राश्च आसन् ।

(घ) राजा स्वपुत्राणामाचारहीनतया उद्विग्रमना आसीत् ।

(ङ) स अचिन्तयत् यत् - पुत्रा मे विद्याहीना न शोभन्ते ।

(च) दैवम् आलस्यं च विहाय पुरुषार्थो विधेय इति चिन्तयित्वा राजा पण्डितसभां कारितवान् ।

(छ) विष्णुशर्मणो महापण्डित आसीत् ।

(ज) राजा निजपुत्रान् नीतिशास्त्रोपदेशाय विष्णुशर्मणः करे समर्पितवान् ।

## ८. अधस्तनीं कथां पठित्वा प्रश्नान् उत्तरयत

पुरा क्वचिद् एकं राज्यमासीत् । तत्र एको राजा शासनं करोति स्म । तस्य द्वौ पुत्रौ आस्ताम् । तयोर्ज्येष्ठस्य नाम राजेन्द्रः कनिष्ठस्य च नाम नरेन्द्र आसीत् । तौ अलसौ उद्दण्डौ च आस्ताम् । तौ सदैव क्रीडतः, विवादं च कुरुतः स्म । तौ ज्येष्ठानां हितवचनं कदापि न शृणुतः स्म ।

तस्य राज्ञो भवने बहवः पशवोऽपि आसन् । ते तयो राजकुमारयोः सेवां कुर्वन्ति स्म । तेषु पशुषु एको वानरो राजेन्द्रस्य प्रिय आसीत् । स वानरोऽपि सदैव तस्य राजकुमारस्य सेवां करोति स्म । एकदा वसन्ततौं सूर्योदये राजेन्द्र उपवने सुप्त आसीत् । तदा एका मक्षिका तस्य नासिकामुपाविशत् । वानरो वारं वारं तां मक्षिकां व्यजनेन निवारयति स्म तथापि सा मक्षिका पुनः पुनरागत्य तत्रैव तिष्ठति स्म । तेन वानरोऽत्यन्तं क्रुद्धोऽभवत् । तां मक्षिकां हन्तुं स खड्गमानीतवान् । स खड्गेन

प्रहारमकरोत् । मक्षिका उड्डीय दूरमगच्छत् प्रत्युत खड्गेन राजकुमारस्य नासिका छिन्ना जाता । अत एव सज्जनाः कथयन्ति– 'मूर्खैः सह मित्रता नोचिता' इति ।

**(क) कथाया उचितं शीर्षकं लिखत ।** **१**

**(ख) कथायास्त्रयाणां पात्राणां नामानि लिखत ।** **१**

**(ग) कथाया एकमुत्तमं सन्देशं चिनुत** **१**

(अ) दिवा न शयनीयम् । (आ) मूर्खेण सह मैत्री हानिकरा भवति ।

(इ) वानरः क्रुद्धः पशुरस्ति । (ई) राजभवने पशवः पालनीयाः ।

**(घ) कथायाः सारांशं लिखत ।** **८**

**(ङ) कथायां वर्णिताः समस्याः काः ? तत्समस्यायाः समाधानाय च के उपाया भवितुं शक्नुवन्ति ? विश्लिष्य लिखत ।** **८**

**९. मञ्जूषायाः साहाय्येन संवादं पूरयत** **१×५=५**

**राजः** = भोः .................... ! कुत्र गच्छसि साम्प्रतम् ?

**रेखा** = चलचित्रस्य ................ नगरकोटं व्रजामि ।

**आदित्यः** = ओ, मया अपि ................ गन्तव्यम् अस्ति ।

**समज्ञा** = मम आरोग्यम् ................. नास्ति किं कुर्याम् ?

हा कष्टम् !

**राजः** = शक्यं चेत् गमनीयम्, नो चेत् निर्देशकः .................. ।

**सर्वे** = अस्तु, तथैव करवाम । दिनाङ्कं परिवर्त्य सज्जतां .............. इति ।

| |
|---|
| उत्तमम्, प्रार्थनीयः, सम्पादयाम, रेखे, चित्रसज्जतार्थम्, तत्र |

**१०. 'भरतमिलापः' इति संवादस्य आधारेण भरतस्य चरित्रवर्णनं कुरुत ।** **५**

**११. अस्माभिः किं कर्तव्यमिति अधस्तनस्य पद्यस्य आधारेण लिखत** **५**

दुर्जनेन समं सख्यं वैरञ्चापि न कारयेत् ।

उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥

**१२. अधस्तनमाचारपद्यं पठित्वा पद्यनिर्दिष्टान् विषयान् वर्णयत**
**५**

आचारहीनं न पुनन्ति वेदाः,

यद्यप्यधीताः सह षड्भिरङ्गैः ।

छन्दांस्येनं मृत्युकाले त्यजन्ति

नीडं शकुन्ता इव जातपक्षाः ॥

**१३. अधस्तन्यौ वैदिक्यौ सूक्ती वर्णयत** २.५×२
**= ५**

(क) निन्दितारो निन्द्यासो भवन्तु । (ऋग्वेदः ५।२।६)

(ख) परि माग्ने दुश्चरिताद् बाधस्व । (यजुर्वेदः ४।२८)

**<<<>>>**